# वेदोपदिष्टमन्तरिक्षविज्ञानम्

अमितकुमारः साउ
विद्यावारिधिशोधकः
रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोधसंस्थानम्, हावाडा
Email : sahoorkmvu@gmail.com

**शोधसारः -** अखिलविश्वप्रपञ्चस्य प्राचीनेषु वाङ्मयेषु विशिष्टस्थानं भजते वेदः। भारतीयार्षपरम्परायाम् ऋषीणां योगदानम् अत्यद्भुतम्। ते च साक्षात्कृतधर्माणः ऋषयः ऋतम्भरया प्रज्ञया अन्तःकरणे सृष्टिविषयकस्य ज्ञानविज्ञानस्य उपलम्भेन महतः ज्ञानराशेः आविष्कारं चक्रुः। तस्यैव ज्ञानस्याभिव्यक्तिः वेदरूपेण बभूव। अस्मिन् प्रबन्धे वयम् अन्तरिक्षविज्ञानविषये चर्चयिष्यामः। प्रकृते अस्माकमभिप्राय ऋषिभिः अन्तरिक्षविषयकवैज्ञानिकचिन्तनेन सार्धं विद्यते। वेदेषु अन्तरिक्षविषये ये विचाराः उपस्थापिताः किं ते ऋषिकल्पनात्मिका उत विज्ञानतत्त्वोपेताः ? इति चेत् यद्यपि तत्रत्याः विचाराः बाह्यतः कथात्मिकाः दृश्यन्ते परन्तु अन्ततो गभीराध्ययनेन ज्ञायते ते तत्त्वोपेता एव इति। वेदेषु ब्रह्माण्डस्य निर्मातारः शक्तयः तत्वानि वा देवनाम्ना आख्यतानि। सामान्यतः एतानि तत्त्वानि सर्वेषु लोकेषु व्याप्तानि, परन्तु विशेषरूपेण केषुचित् लोकेष्वेव मुख्यतां दरीदृश्यते। वस्तुतः पृथिवीद्यावान्तरिक्षाख्याः त्रय एव लोका मुख्यतां भजन्ते। अतो भगवान् यास्कः पृथिवी-द्यौ-अन्तरिक्षमित्येतान् त्रीन् लोकानाश्रित्य त्रिषु स्थलेषु देवतानां स्थानं निर्दिदेश। संहितासु विद्यमानेषु मन्त्रेषु यस्य संकेतः प्राप्यते तस्य विश्लेषणं ब्राह्मणग्रन्थेषु प्राप्नुमः। अन्तरिक्षस्थानीय देवानां विवेचनेन अन्तरिक्षविज्ञानविषयकानां नाना शाखानामपि ज्ञानं प्राप्तुम् अर्हामः। अस्यां दिशि वैज्ञानिकाध्ययनस्य आवश्यकता विद्यते। अन्तरिक्षविज्ञानान्तर्भूतस्य दिग्विज्ञानस्य, जलविज्ञानस्य, गतिविज्ञानस्य, विद्युद्विज्ञानस्य, रसविज्ञानस्य, वायुविज्ञानस्य च महत्वं सर्वान् अतिशेते।

********

कूटशब्दाः – वेदः, पृथिवी, द्यौः, अन्तरिक्षम्, दिग्विज्ञानम्, जलविज्ञानम्, विद्युद्विज्ञानम्, अम्बरम्, पुष्करम्, अध्वरम्।

********

वेदेषु भूः भुवः स्वः महः जनः तपः सत्यञ्चेति सप्त लोकाः उपदिष्टाः। एतेषां सप्तव्याहृतिरित्यप्यभिधानं विद्यते लोके। एतेषु आदितः तिस्रः व्याहृतयः त्रिलोकनाम्ना जगति प्रसिद्धाः सन्ति। तैत्तरीयोपनिषदि महाख्या चतुर्थी व्याहृतिः दृश्यते। महाचमसाख्यस्य आचार्यस्य नाम्ना तस्य सत्ता स्वीकृता।[1] ऋग्वेदे तु महाख्येन पृथक् लोकस्य व्याहृतेर्वा नाम न प्राप्यते। तस्मिन् भुर्भुवसुवं विहाय नाकविष्टबाख्ययोः द्वयोः लोकयोः नाम प्राप्यते। ऋग्वेदे नाकशब्दस्य द्वात्रिंशद्वारं विष्टप्-शब्दस्य च द्वादशवारं उल्लेखः सम्प्राप्यते। नाकविष्टबौ पृथक् लोकौ उत स्वर्गवाचकौ इत्यस्मिन् विषये साम्प्रतमपि विवदन्ते विद्वांसः। क्वचित् नाकलोकस्यैव पर्यायवाचित्वेन स्वर्गलोकस्य प्रयोगः प्राप्यते क्वचिच्च नाकलोकस्योपरि स्वर्गलोक इत्यख्यात् द्वयोः पृथक् सत्तां निश्चीयते विद्वद्भिः।[2]जैमिनीयब्राह्मणे नाकस्वर्गविष्टबानां ऐक्यं प्रतिपादितम्। परन्तु तैत्तरीयसंहितायां नाकस्य द्युलोकेन सह तादात्म्यमुक्तम्. द्युलोकस्योपरि नाकलोक इत्युपदिष्टम्। तदुक्तम् –

“पृथिव्या अहमुदन्तरिक्षमारूहमन्तरिक्षाद् दिवमारूहम्।

---

[1] भुर्भुवः सुव इति वा एतास्तिस्रः व्याहृतयः। तासामु ह स्मैतां चतुर्थी माहाचमस्यः प्रवेदयते मह इति। तैत्तरीयोपनिषद्. १/५/१

[2] सो (प्रजापतिः)ऽब्रवीन्न वै म इदमकमभूदिति। यदब्रवीन् न वै म इदमकमभूदिति तन्नाकस्य नाकत्वम्। स एष वाव नाको यद् दशममहरेष स्वर्गो लोक एतद् ब्रन्धस्य विष्टपम्। जैमिनीयब्राह्मणम्. ३/३८५


©Indira Gandhi National Open University

दिवो नाकस्य पृष्ठात् सुवज्योतिरगाममहम्"॥[3]

अस्यैव मन्त्रस्य व्यख्यानावसरे सायणाचार्यः दिवः नाकस्य चेत्यनयोः पदयोः सामानाधिकरण्यं प्रतिपाद्य नाकः द्युलोकस्य विशेषणमित्युवाच। सायणाचार्यस्य नये नाको नाम द्युलोकसम्बन्धी तत्स्थानं यस्मिन् दःखस्य लेशोऽपि नास्ति।[4] अन्तरिक्षं पृथिवीद्युलोकयोः मध्ये विराजते, अत्र सन्देहस्य अवकाश एव नास्ति। अन्तरिक्षस्य यन्निर्वचनं वैदिकसंहितासु प्राप्यते तेन तस्य पृथिवीद्युलोकयोः मध्ये स्थितिस्सिध्यति। शतपथब्राह्मणे उक्तं पुरा पृथिवी द्यौश्च पृथगास्ताम्। द्वयोः पृथग्भूतत्वात् तयोः मध्ये स्थितस्य आकाशस्यैव अन्तरिक्ष इत्याख्यानम्। तयोः विच्छेदस्य पूर्व अकाशास्य "ईक्षः" इति संज्ञा आसीत्, यदा पृथिवीदिवौ भिन्तः तदा आकाशस्य मध्ये विद्यमानत्वाद् "अन्तरिक्षम्" इति संज्ञा सम्पन्ना। अतः उक्तम् – सह हैवेमावग्रे लोकावासतुस्तयोर्वियतोर्योऽन्तरेणाकाश आसीत्तदन्तरिक्षमभवदीक्षं हैतन्नाम ततः पुराऽन्तरा वा इदमीक्षमभूदिति तस्मादन्तरिक्षम्।[5] अन्तरिक्षेणैव पृथिवीदिवौ विभक्तौ।[6] द्वयोः मध्ये स्थिततत्वात् तस्य अन्तरिक्ष इति संज्ञा। अतः ताण्ड्यब्राह्मणे अस्य मध्यलोकः इति संज्ञा।[7] मैत्रायणीसंहिता अन्तरिक्षं द्विधा व्यभजत्। अन्तरिक्षस्य एकस्य भागस्य पृथिव्या सह अपरस्य च द्युलोकेन सह संयोगो विद्यते। तदुक्तम् – "अर्द्धं ह्यन्तरिक्षस्यास्मिल्लोकेऽर्धममुष्मिन् लोके (द्युलोके) "।[8] अनेनेदं स्पष्टं यावत् पृथिव्याः मध्याकर्षणं तावत् अन्तरिक्षस्य अधोभागः पृथिवीगुणविशिष्टात् पृथिव्या अंशः अन्तरिक्षस्य उपरितनभागः द्युगुणात्मत्वाद्द्युलोकस्यांशः। इमामेव युक्तिम् "इयं (पृथिवी) अन्तरिक्षम्"[9] इत्यदिना दृढीकरोति ऐतरेयब्राह्मणम्। निघण्टावपि अन्तरिक्षवाचकेषु शब्देषु पृथिव्या अपि अभिधानं कृतम्।[10] पृथिवीदिवोः सम्बन्धकर्ता अन्तरिक्षमिति सालङ्कारवाक्यैः प्रतिपादिते ताण्ड्यब्राह्मणे प्रोक्तम् उधस्स्वरूपविशिष्टान्तरिक्षस्य पृथीवीद्यावाख्यौ द्वौ पयोधरौ पृथिव्याख्येन पयोधरेण देवताभ्यो रसं प्रददाति अपरेण द्युविशिष्टेन पयोधरेण पृथिव्यां राजमानेभ्यः सर्वेभ्यः प्राणिभ्यो रसं प्रयच्छति।[11] अर्थाद् द्युलोकात् पृथिव्यां प्राणिभ्यः रसप्रदानस्य तथा पृथिव्याः देवताभ्यः रसप्रदानस्य कार्यं करोति अन्तरिक्षम्।

वेदेषु ब्रह्माण्डस्य निर्मातारः शक्तयः तत्वानि वा देवनाम्ना आख्यतानि। सामान्यतः एतानि तत्त्वानि सर्वेषु लोकेषु व्याप्तानि, परन्तु विशेषरूपेण केषुचित् लोकेष्वेव मुख्यतां दरीदृश्यते। वस्तुतः पृथिवीद्यावान्तरिक्षाख्याः त्रय एव लोका मुख्यतां भजन्ते। अतो भगवान् यास्कः पृथिवी-द्यौ-अन्तरिक्षमित्येतान् त्रीन् लोकानाश्रित्य त्रिषु स्थलेषु देवतानां स्थानं निर्दिदेश। अर्थात् पृथिवीस्थानीयदेवता, द्यौस्थानीयदेवता, अन्तरिक्षस्थानीयदेवताश्च। पृथिवीस्थानीयासु देवतासु अग्निः, अन्तरीक्षीयदेवतासु इन्द्रो वायुर्वा, द्युस्थानीयदेवतासु च सूर्यः प्रामुख्यं भजते। उक्तं च निरुक्ते - "तिस्र एव देवता इति नैरुक्ताः। अग्निः पृथिवीस्थानो वायुरिन्द्रो वा अन्तरिक्षस्थानः सूर्यो द्युस्थानः"।[12] आचार्ययास्कानुसारं वस्तुतः एताः तिस्रः

---

3 तैत्तरीयसंहिता – ४/६/५/२

4 दिवः द्युलोकसम्बन्धी नाकः दुःखरहितो यः प्रदेशस्तस्य पृष्ठात् उपरिष्टात्। तैत्तरीयसंहितायाः सायणभाष्यम् – ४/६/५/२

5 शतपथब्राह्मणम् – ७/१/२/२३

6 अन्तरीक्षेण हीमे द्यावापृथिवी विष्टब्धे। शतपथब्राह्मणम् – १/२/१/१६

7 अयं मध्यमो (लोकः – अन्तरिक्षम्) बृहती – ताण्ड्यब्राह्मणम् – ३/८/९

8 मैत्रायणीसंहिता – ३/८/९

9 ऐतरेयब्राह्मणम् – ३/३१

10 निघन्टुः – १/३/९

11 ऊधर्वा अन्तरिक्षं स्तनावधितोऽनेन पृथिवीरूपेण स्तनेन वा एष देवेभ्यो दुग्धेऽमुना प्रजाभ्यः। ताण्डब्राह्मणम् – २४/१/६

12 निरुक्तम् – ७/५


©Indira Gandhi National Open University

एव देवताः अन्ये तु एतेषां नामान्तरमात्रम्। अत उक्तम् - "तासां महाभाग्यादेकैकस्या अपि बहूनि नामधेयानि भवन्ति"।[13] विज्ञानदृष्ट्या एतेषु त्रिष्वपि देवतत्त्वेषु एकरूपता विद्यते। एतेषु अग्निः मुख्यः तस्यैव भास्वरस्वरूपो वायुः तेजोरूपश्च विवस्वान्। कस्यचिदपि रूपस्य निर्माणमग्नेः कर्म।[14] रसस्य संसरणं वलविषयकं वा यत्किमपि तत्सर्वं इन्द्रस्यैव कार्यं भवति।[15] रश्मिभिः पृथिव्याः रसादानम् आकाशे तस्य धारणं तथा च सर्वस्य पोषणकर्म करोति भास्वान्।[16] निघण्टौ पृथिवीद्यौस्थानीयदेवतापेक्षया अन्तरिक्षीयदेवानां संख्याऽनेका वर्तन्ते। तत्र द्विपञ्चाशत् पृथिवीस्थानीयदेवताः, द्वात्रिंशद्द्युस्थानीयाः षट्षष्टिः अन्तरिक्षस्थानीयाश्च देवता उपदिष्टाः। तासां अन्तरिक्षस्थानीयदेवतानां सूची अधः प्रदीयते –

१. वायुः, २. वरुणः, ३. रुद्रः, ४. इन्द्रः, ५. पर्जन्यः, ६. बृहस्पतिः, ७. ब्रह्मणस्पतिः, ८. क्षेत्रस्य पतिः, ९. वास्तोष्पतिः, १०. वाचस्पतिः, ११. अपांनपात्, १२. यमः, १३. मित्रः, १४. कः, १५. सरस्वान्, १६. विश्वकर्मा, १७. तार्क्ष्यः, १८. मन्युः, १९. दधिक्राः, २०. सविता, २१. त्वष्टा, २२. वातः, २३. अग्निः, २४. वेनः, २५. असुनीतिः, २६. ऋतः, २७. इन्दुः, २८. प्रजापतिः, २९. अहिः, ३०. अहिर्बुध्न्यः, ३१. सुपर्णः, ३२. पुरुरवाः। इति द्वात्रिंशत्पदानि।

१. श्येनः, २. सोमः, ३. चन्द्रमाः, ४. मृत्युः, ५. विश्वानरः, ६. धाता, ७. विधाता, ८. मरुतः, ९. रुद्राः, १०. ऋभवः, ११. अङ्गिरसः, १२. पितरः, १३. अथर्वाणः, १४. भृगवः, १५. आप्त्याः, १६. अदितिः, १७. सरमा, १८. सरस्वती, १९. वाक्, २०. अनुमतिः, २१. राका, २२. इन्द्राणी, २८. गौरी, २९. गौः, ३०. धेनुः, ३१. अघ्न्या, ३२. पथ्या, ३३. स्वस्तिः, ३४. उषाः, ३५. इळा, ३६. रोदसी। इति षट्-त्रिंशत्पदानि।

एतेषां देवानां नामानि अन्तरिक्षवर्गे उपदिष्टत्वादनुमीयते एतेषां कार्यस्थलानि प्रामुख्येन अन्तरिक्षे एव। अन्तरीक्षियस्थानीयेषु देवेषु अग्नेः नाम पृथिवीगणेऽपि (५.१.१) प्राप्यते, तथा च विश्वानरः (५.५.५) सविता (५.४.२०) उषाः (५.५.३४), त्वष्टा, (५.४.२१), वरुणः (५.४.२) यमः (५.४.१२) चेत्येतेषां नाम द्युस्थानीयदेवगणे प्राप्यते। सूक्ष्मवायूपेतो मरुदन्तरिक्षस्य परितः व्याप्यत्वात् तस्य वरुण इति संज्ञा। अन्तरिक्षस्थानीयविद्युतः अग्निः जायते अतो विद्युदग्निरेव। परन्तु द्वयोः भेदं यास्काचार्यः सयुक्तिकं प्रतिपादयामास। "वैश्वानरः" इति शब्दस्य निर्वचनकाले यास्काचार्यः शाकपुण्याख्यस्य आचार्यस्य नाम उदधरत्। शाकपुण्याचार्यस्य मतानुगणं पार्थिवस्य अग्नेर्नाम "वैश्वानर" इति, तथा च मध्यस्थानीयविद्युदग्निः, द्युस्थानीयश्च सूर्याग्निः "वैश्वानरः" इत्याख्यः।[17] यदा विद्युदग्निः स्वाश्रयभूतं मेघं अभिहन्ति यदा स्वमूलरूपे परिणम्यते, तदा केनचित्पार्थिवपदार्थेन साकं तस्य ग्रहणं न भवति। तदैव तस्य नाम भवति मध्यमस्थानीयो अर्थादन्तरिक्षस्थानीयो विद्युदग्निरिति। तदा तस्य इन्धनं भवति उदक्, उपशमकञ्च दारु। यदा स पार्थिवेन वस्तुना सह संयुङ्क्ते तदा स अग्निरूपं धरति। तस्यां स्थितौ काष्ठं तस्य इन्धनं भवति वारि च उपशमकम्।[18]

सवितुः अन्तरिक्षे द्यवि च उभयत्र परिगणनं सम्प्राप्यते। "सविता यन्त्रैः पृथिवीमरम्णात्"[19] इति मन्त्रस्य व्याख्याने यास्कः सवितारं अन्तरीक्षस्थानीयत्वेन व्यख्यात्। अयं सविता शक्तिधरो विद्युन्मयो वायुः, यः आधाररहिते समुद्राख्ये

---

[13] निरुक्तम् – ७/५

[14] यच्च किञ्चिद् दार्ष्टिविषयिकमग्निधर्मैव तत्। निरुक्तम् – ७/८

[15] अथास्य कर्म रसानुप्रदानं वृत्रवधो या च का च बलकृतिरिन्द्रकर्मैव तत्। निरुक्तम् – ७/१०

[16] अथास्य कर्म रसादानं रश्मिभिश्च रसधारणं यच्च किञ्चित् प्रवह्लितमादित्यकर्मैव तत्। निरुक्तम् – ७/११

[17] अयमेवाग्निर्वैश्वानर इति शाकपूणिः। विश्वानरावेते उत्तरे ज्योतिषी। वैश्वानरोऽयं यत्ताभ्यां जायते। निरुक्तम् – ७/२३

[18] कथं न्वयमेताभ्यां जायते इति। यत्र वैद्युतः शरणभिहन्ति यावदनुपातो भवति मध्यमधर्मैव तावद् भवत्युदकेन्धनः शरीरोपशमन एवायं सम्पद्यत उदकोपशमनः शरीरदीप्तिः। निरुक्तम् – ७/२३

[19] सविता यन्त्रैः पृथिवीमरम्णादस्कम्भेन सविता द्यामदृंहत्।


©Indira Gandhi National Open University

अन्तरिक्षे पृथिवीं स्वशक्त्या दृढतापूर्वं धारयति। भगवान् यास्कः – "सविता यन्त्रैः पृथिवीमरमयदनारम्भणेऽन्तरिक्षे। सविता द्यामदृंहदश्वमिवाधुक्षद् धुनिमन्तरिक्षे मेघं बद्धमतूर्ते बद्धमतूर्ण इति वात्वरमाण इति वा, सविता समुदितारमिति। कमन्यं मध्यमादेवमवक्ष्यत्।"[20] इति ऋग्वेदस्य प्रथममण्डलस्य ऊनपञ्चाशदधिकैकशतमे सूक्ते स्वभाष्ये सवितारं पृथिवीस्थानीयदेवत्वेन व्याख्यातवान्। निघण्टौ – अम्बरं, वियत्, व्योम, बर्हि, धन्व, अन्तरिक्षम्, आकाशम्, आपः, पृथिवी, भूः, स्वयम्भूः, अध्वा, पुष्करं, सगरः, समुद्रः, अध्वरम् इति षोडश अन्तरिक्षनामान्युपदिष्टानि।[21] अन्तरिक्षस्य एतानि नामानि तस्य नाना धर्मान् उपदिशति। तैः नामभिः वयं तस्य गुणान् ज्ञास्यामः –

**अम्बरम्** – अबि – शब्दे तथा रा- गतौ इत्यनयोः धातोः कप्रत्यये अम्बरशब्दः निष्पद्यते। शब्दजनकत्वात् अन्तरिक्षस्य अम्बरिमित्याख्यानम्। शब्दः आकाशस्य गुणः, यत्र शब्दो भवति तत्र आकाशस्य सत्ता भवति। आकाशं विना शब्दो नोत्पद्यते। ऋग्वेदे अम्बरशब्दः सकृत्प्रयुक्तः।[22] अनेन वयं शब्दविज्ञानस्य ज्ञानं प्राप्नुमः। न

**वियत्** – वियच्छति विरमतीत्यर्थात्मिकात् विपूर्वकात् यम-उपरमे इत्यस्माद्धातोः "अन्येभ्योपि दृश्यन्ते"[23] इत्यनेन क्विपि प्रक्रियाकार्ये वियदितिरूपं सिध्यति। सृष्टिधारकाणां सर्वेषां तत्त्वानां विशेषरूपेण नियन्त्रणादन्तरिक्षस्य वियदिति संज्ञा।

**व्योम** – विपूर्वकात् अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गन-हिंसादानभागवृद्धिषु इत्यस्माद्धातोः औणादिके मनिन्प्रत्यये प्रक्रियायां व्योमेति रूपं सिध्यति। अस्यार्थस्तावत् व्यवति व्याप्नोति सर्वं जगदिति व्योम। अर्थात् पृथिव्या उपरि आवरणत्वेन भूत्वा सर्वं जगत् रक्षति। आचार्यः यास्कः व्योम इत्यस्य व्यवनार्थमपि स्व्यकार्षीत्।[24] व्योम नाम पृथिव्या उपरि अन्तरिक्षम् परमव्योम च द्युलोकस्योपरि सर्वोच्चलोकः।

**बर्हिः** – बृंह बृद्धौ शब्दे च इत्यस्माद्धातोः बर्हिशब्दो निष्पद्यते। परितो व्याप्यत्वात् अन्तरिक्षस्य बर्हिः इति संज्ञा। बर्हिशब्दः अन्तरिक्षस्य व्यासं द्योतयति। ।

**धन्व** – धवि-गतौ धातोः कनिन्प्रत्यये धन्वशब्दः जायते। अन्तरिक्षस्य मेघस्थं जलं अधः स्रवति, अतः अन्तरिक्षस्य धन्व इति संज्ञा।

**अन्तरिक्षम्** – ऋग्वेदे षोडशवारं अन्तरिक्षशब्दस्य स्वतन्त्ररूपेण प्रोयगं प्राप्नुमः। वारचतुष्टयं समस्तपदेषु, वारद्वयं च तद्धितप्रयोगयोः अन्तः प्राप्तमस्माभिः।[25] सर्वत्र अन्तरिक्षशब्दो लोकस्य वाचकः। अयं शब्दः पृथिवीदिवोः मध्ये स्थितत्वं सूचयति।

**आकाशः** – ऋग्वेदे कुत्रापि आकाशशब्दस्य प्रयोगः न प्राप्यते। पृथिवीद्युलोकयोर्मध्ये अवकाशत्वात् तस्य आकाश इति अभिधानम् एवं शतपथब्राह्मणे प्रतिपादितम्।

---

अश्वमिवा

20 निरुक्तम्- ७/२३

21 निघण्टुः – १/३/१ - १६

22 यन्नासत्या परावति यद्वा स्थोऽध्यम्बरे।

अतः सहस्रनिर्णिजा रथेना यातमश्विना॥ ऋग्वेदः – ८/८/१४

23 अष्टाध्यायी – ३/२/१७८

24 परमे व्यवने। निरुक्तम् – ११/४०

ऋचश्च परमे व्यवने धीयन्ते। निरुक्तम् – १३/११

25 ऋग्वेदपदानुक्रमसूची द्रष्टव्या।


©Indira Gandhi National Open University

**आपः** – आप्लृ व्याप्तौ इत्येतस्माद्धातोः असुन्प्रत्यये आप इति रूपं सिध्यति। अन्तरिक्षवाचकेषु पदेषु मध्ये स्थितत्वाद् आपः अन्तरिक्षस्थस्य जलस्य द्योतकः। आपो नाम जलं, सर्वव्यापकेन जलेन सह सम्बन्धत्वात् अन्तरिक्षस्यापि आप इति संज्ञा। अन्तरिक्षं सर्वान् व्याप्य तिष्ठति अतः अन्तरिक्षस्य आप इत्याख्यानम्। अस्माद् जलविज्ञानस्य ज्ञानं लभ्यते।

**पृथिवी** – अन्तरिक्षवाचकेषु पठितेषु शब्देषु पृथिवीपदं तस्य पृथुतां द्योतयति। अन्तरिक्षाय भूयशः प्रयुक्तः "उरु"- शब्दः तस्य पृथुतायाः उरुत्वस्य वा द्योतकः। अन्तरिक्षस्य अर्धभागस्य पृथिव्या सह सम्बन्धो वर्तते, अतः मैत्रायणीसंहितानुसारमन्तरिक्षस्यापि पृथिवीत्वं वर्तते।[26] अन्तरिक्षस्य पृथिवीत्वं द्योतयता निरुक्तकर्त्रा गदितम् - "प्रथनात् पृथिवीत्याहुः क एनामप्रथयिष्यत् किमाधारश्चेत्यथ वै दर्शनेन पृथुरप्रथिता चेदप्यन्यैः"[27]।

**भूः** – भू-सत्तायामित्यस्माद्धातोः भवत्यस्मादिति व्युत्पत्या निष्पन्नो भूः शब्दः अन्तरिक्षस्यापि वाचकः। इन्द्रेण मेघस्य कर्तनात् अन्तरिक्षाद्वारि वर्षति। अतः अन्तरिक्षस्य भूरिति संज्ञा।

**स्वयम्भूः** – स्वयं भूतत्वादन्तरिक्षस्य स्वयम्भूरिति नाम।

**अध्वा** – ऋग्वेदे अध्वापदस्य द्वादशवारं प्रयोगः सम्प्राप्यते। अखिलस्य नक्षत्रमण्डलस्य विचरणमार्गत्वात् अन्तरिक्षस्य "अध्वन्" इति आख्यानम्।

**पुष्करम्-** ऋग्वेदे पुष्करशब्दस्य प्रयोगः त्रिः प्राप्यते। पुष्करिणीशब्दस्य च द्विः प्राप्यते। पुष पोषणे पुज पुजायाम् इत्यनयोः धातोः पुष्करशब्दं निर्वाचयाम्बभूव यास्कवर्यः। अत्यावश्यकजलप्रदानेन पृथिवीस्थान् प्राणिनः पोषति अन्तरिक्षमित्यतः तस्य "पुष्करम्" इति नाम। वृष्टिप्रदायकत्वात् सर्वैः पूज्यते अतः तत् "पुष्करम्"।[28] अस्य शब्दस्य निर्वचनविषये शतपथब्राह्मणे एकमाख्यानं प्राप्यते। इन्द्रः वृत्रस्य हननानन्तरमपि अचिन्तयत् यदहं बृत्रं हन्तुमक्षमोऽस्मि। अतः भीतः सन् स जलं प्राविशत्। तत्र स्थितः सन् आदिशत् अहं भीतोऽस्मि मम कृते पुरं निर्मातु। ततः तत्र पुरस्य निर्माणमभवत्। अतः पूः कृ-धातोश्च आधारेण पुष्करशब्दो निष्पन्नः। अनेन निर्वचनेन स्पष्टं जलस्य सूक्ष्मं रूपं अन्तरिक्षे व्याप्तम्। तस्मिन्नेव विद्युद्रूप इन्द्रो राजते। अन्तरिक्षमेव पुष्करं यस्मिन् सर्वे रसाः तत्र परिपूर्णाः तदेव विद्युतोऽपि संरक्षकः। सर्वेषां रसानाम् आश्रयभूतत्वाद् अन्तरिक्षं सरोवरवद्भवति। तस्य जलं न कदापि शुष्यति। अन्तरिक्षस्य सादृश्येन पार्थिवस्य सरोवरस्यापि पुष्करेत्याख्यानम्।

**सगरः** – गरेण सह वर्तमानः सगरः। ऋग्वेदे सगरशब्दस्य सकृत्प्रयोगं लभामहे।[29] अन्तरिक्षात्प्रवहमानेन जलेन साकं सगरः उपमीयते। अतः सगराख्यादन्तरिक्षात् प्रवहमानस्य जलभाण्डारस्य "सागरः" इति नाम। ततः अनन्तर्धानेन प्रवहमानत्वात् अन्तरिक्षस्य सगरत्वम्। तत्र एतावत् जलं वर्तते यत् कदापि न शुष्यति।

**समुद्रः** – पार्थिवस्य अन्तरिक्षस्य च उभयोः कृते समुद्रपदस्य प्रयोगः प्राप्यते वेदे। समुद्रस्य उभयात्मकत्वात् यास्कमुनिः द्वौ समानरूपेण निर्वाचयामास। परन्तु द्वयोः कृते उपपत्तयः भिन्ना वर्तन्ते। पञ्चधा समुद्रपदस्य निर्वचनं सम्प्राप्यते[30] -

---

26 मैत्रायणीसंहिता – ३/८/९

27 निरुक्तम् – १/१४

28 पुष्करमन्तरिक्षं पोषति भूतान्युदकम्। पुष्करं पूजकरं पूजयितव्यं वा। इदमपीतरत् पुष्करमेतस्मादेव। पुष्करं वपुष्करं वा। निरुक्तम् – ५/१४

29 इन्द्राय गिरो अनिशितसर्गा अपः प्रेरयं सगरस्य बुध्नात्। ऋग्वेद – १०/८९/४


©Indira Gandhi National Open University

१. समुद्भ्याम्पूर्वस्य द्रु गतौ धातोः (समुद्रवन्त्यस्मादापः) समुद्रशब्दः निष्पन्नः। यतः अन्रिक्षस्थो मेघो विद्युता विछिन्नः सन् जलं स्रावयति अतोऽन्तरिक्षस्य समुद्रसंज्ञा। पार्थिवसमुद्राच्च जलं वाष्पो भूत्वा उपरि गच्छति अतः पार्थिवस्यापि समुद्रसंज्ञा।
२. समभिभ्यामुत्तरस्य द्रु गतौ धातोः (समभिद्रवन्त्यस्मादापः) प्रक्रियया समुद्रशब्दः सिद्धः। पार्थिवसमुद्राज्जलं वाष्पो भूत्वा उपरि गच्छति अतः अन्तरिक्षस्य समुद्रः इति आख्यानम्। अनरिक्षाच्च जलं वृष्टिद्वारा समुद्रेषु नदीभिश्च समुद्रेषु आगच्छन्ति अतः पार्थिवसमुद्रस्यापि समुद्र इति अभिधानम्।
३. समुत्तरस्य मुद हर्षे धातोः (समुदको भवति) प्रक्रियाकार्ये समुद्रशब्दः सञ्जातः। यदा अन्तरिक्षाद्वृष्टिः भवति तदा अन्तरिक्षेषु डयमानाः विहगादयः मोदन्ते अतः तस्य समुद्र इति आख्या।
४. सम्पूर्वकाद् उन्दी क्लेदने (समुनत्तीति) धातोः समुद्रशब्दो निष्पद्यते। मेघो यदा जलं स्रावयति तदा सर्वान् क्लेदयति पार्थिवः समुद्रोऽपि क्लेदनकर्म करोति अतः पार्थवस्यापि समुद्रसंज्ञा।

अन्तरिक्षवाचकानि सर्वानि निर्वचनानि अन्तरिक्षस्य सदा जलेन परिपूर्णतां संकेतयति। तच्च जलं सदा सर्वेभ्यः प्राणान् प्रयच्छति।

**अध्वरम् –** वस्तुतस्तु अध्वपपदस्य प्रयोगः बाहुल्येन यज्ञार्थे प्राप्यते। परन्तु निघन्टौ अन्तरिक्षवाचकेषु पदेषु अस्य पाठः प्राप्यते। तस्य कारणं अन्तरिक्षे एव अग्निषोमात्मकयज्ञः सततमनुष्ठीयते। योऽयं वायुः पवते स एव यज्ञः इति शतपथब्राह्मणमैत्रायणीसंहितादिषु उपदिष्टम्।[31] तैत्तरीयारण्यके उच्यते यज्ञस्य सर्वे अवयवाः अन्तरिक्षे विराजन्ते। अन्तरिक्षरूपस्य यज्ञस्य मेघः शकटः, विद्युदग्निः अस्ति, वर्षा हविः, शब्दः वषट्कारः यद्गूर्जनं भवति तदेव अनुवषट्कारः, वायुः यज्ञस्य आत्मा तथा अमावास्या तस्य स्विष्टकृद्वर्तते।[32] एवं च् अन्तरिक्षे सर्वाङ्गसहितस्य यज्ञस्य सत्त्वात्तस्य अध्वरमित्याख्यानें स्वाभाविकमेव। अन्तरिक्षस्थेन यज्ञेन हि देवताः सर्जनशक्तिं प्राप्नुवन्ति, पार्थिवाय भूताय ओषधिवनस्पतयः प्राप्यन्ते, एतैश्च विना जीवाः प्राणान् धारयितुमक्षमाः। अस्मात् यज्ञकारणादेव ग्रीष्मवर्षादि ऋतुचक्रं भवति। ऋतुरूपस्य यज्ञस्य आधारः अन्तरिक्षमेव। दर्शपूर्णमास-चातुर्मास्य-पशुबन्ध-आग्निष्टोम-उक्त्थ्य-अतिरात्र-षोडशी-गवामयन-आदित्यानामयनादीनां सत्राणां सम्पादनम् अन्तरिक्षे एव भवति। पुरुषसूक्ते यस्य यज्ञस्य उल्लेखः प्राप्यते स एव राष्ट्रीयज्ञः।

**उपसंहारः –** उपर्युक्तं सर्वं विचार्य वक्तुं शक्यते तस्य स्वरूपस्य ज्ञानाय अन्तरिक्षविज्ञानस्य च अध्ययनाय तस्य स्वरूपज्ञानाय च वेदस्य देवविषयकान् तत्त्वविषयकान्वा सन्दर्भान् निगूढतया सर्वैः ज्ञातव्यम्। संहितासु विद्यमानेषु मन्त्रेषु यस्य संकेतः प्राप्यते तस्य विश्लेषणं ब्राह्मणग्रन्थेषु प्राप्नुमः। अन्तरिक्षस्थानीय देवानां विवेचनेन अन्तरिक्षविज्ञानविषयकानां नाना शाखानामपि ज्ञानं प्राप्तुम् अर्हामः। अस्यां दिशि वैज्ञानिकाध्ययनस्य आवश्यकता विद्यते। अन्तरिक्षविज्ञानान्तर्भूतस्य दिग्विज्ञानस्य, जलविज्ञानस्य, गतिविज्ञानस्य, विद्युद्विज्ञानस्य, रसविज्ञानस्य, वायुविज्ञानस्य च महत्वं सर्वान् अतिशेते। अस्य स्वरूपं विशेषतः वेदेषु अन्तर्हितमेव। आधुनिकविज्ञानेन सह अस्य तुलनात्मकाध्ययनस्यापि आवश्यकता विद्यते।

*******

## आश्रितग्रन्थसूची

---

[30] समुद्रः कस्मात् समुद्रवन्त्यस्मादापः, समभिद्रवन्त्येनमापः, सम्मोदन्तेऽस्मिन् भूतानि, समुदको भवति, समुनतीति वा। निरुक्तम् – २/१०

[31] अयं वै यज्ञो योऽयं (वायुः) पवते। शब्रा. १/९/२/२८, २/१/४/११, ४/४/४/१३, ११/१/२/३, मैत्रायणीसंहिता १/४/९, गोपथब्राह्मणम् १/३/२, ४/१

[32] तस्य वा एतस्य यज्ञस्य मेघो हविर्धानं विद्युदग्निर्वर्षं हविस्तनयित्नुर्वषट्कारो यदवस्फूर्जति सोऽनुवषट्कारो वायुरात्माऽमावास्या स्विष्टकृत्। तैत्तरीयारण्यकम् – २/१४/१


©Indira Gandhi National Open University

१. अम्भोवादः, पं मधुसूदन ओझा विरचितम्, सम्पा. डॉ. डयानन्दभार्गवः, पं मधुसूदन ओझा शोधप्रकोष्ठः, जोधपुरम् (२००२)

२. आवरणवादः, पं. मधुसूदन ओझा विरचितम्, हिन्दी अनुवादकः – पं. अनन्तशर्मा, सम्पा. डा. दयानन्दभार्गवः, पं. मधुसूदन ओझा शोधप्रकोष्ठः, जोधपुरम् (१९९३)

३. ऋग्वेदानुक्रमणी, वेंकटमाधवकृतम्, हिन्दीव्याख्यासहितम्, सम्पा. विजयपालः,बहालगढ़, सोनीपत (१९७९)

४. निघण्टु -सम्पा. वी के. राजवाडे, भण्डारकर ओरियेण्टल रिसर्च इन्स्टीच्यूट, पुना – (१९४०)

५. निरुक्तम् – यास्कप्रणीत, दुर्गाचार्यकृत-भाष्यसहितम्, श्रीवेंकटेश्वरमुद्रणमन्त्रालयः, मुम्बई (वि. सं. १९८२)

६. वेदविज्ञानमञ्जूषा, सम्पा. के. एन. पाठकः, वेदविज्ञानशोधसंस्थानम्, भरतपुरम् (राजस्थानम्), (१९८८)

७. तैत्तरीयारण्यकम्, आनन्दाश्रमः, संस्कृतग्रन्थावली, सं ३६, पुना (१९२६)

८. गोपथब्राह्मणम् , क्षेमकरण त्रिवेदिकृतं भाषानुवादसहितम्, सम्पा. डॉ. प्रज्ञादेवी एवं मेधादेवी, चौखम्बासंस्कृतप्रतिष्ठानम्, दिल्ली (१९९९)

९. ऋग्वेदसंहा, सायणभाष्यसहितम्, वैदिकसंशोधनमण्डलम्, पुना।

१०. https://ashtadhyayi.com/


***********


©Indira Gandhi National Open University